International Journal of Advanced Academic Studies 2020; 2(3): 493-496




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(3): 493-496
Received: 15-05-2020
Accepted: 20-06-2020

**डॉ. कमलेश कमल**
पूर्व गवेषक, संस्कृत–विभाग,
पटना विश्वविद्यालय, पटना,
बिहार, भारत

**Corresponding Author:**
**डॉ. कमलेश कमल**
पूर्व गवेषक, संस्कृत–विभाग,
पटना विश्वविद्यालय, पटना,
बिहार, भारत

# अथर्ववेदस्य वर्ण्यविषयाः

**डॉ. कमलेश कमल**

**प्रस्तावना**

वेदसंहितासु अथर्वसंहिताया अध्ययनम् उपेक्षितमेव दृश्यते। भ्रमवशात् वेदत्रयीमध्ये अथर्ववेदस्य परिगणनाभावात् केचन विद्वांसः अथर्ववेदं वेदमेव न स्वीकुर्वन्ति। एनं तु प्रायः ''जादू–टोना टोटका''– इत्यादयस्य विषयस्य वर्णयितारं मन्यन्ते। परम् अथर्ववेदस्य अध्ययनं प्राक्कालिकभारतीयजीवनस्य समग्रतां दर्शयितुं समर्थं विद्यते। यतो हि अस्मिन् आजन्म–मरणम् अपि च मृत्योरपि पश्चाद्वर्तिनः जीवनस्य वर्णनम् वैशयेन काव्यत्वेन च विद्यते। अस्मिन् आत्मचिन्तनस्य ब्रह्मचिन्तनस्य च स्रोतस्विनी अन्यसंहिताः ना मपेक्षया प्रखररूपेण प्रवहन्ती दृश्यते।

वेदोयम् अनेकरूपेण विशदमध्ययनमपेक्षते। अस्मिन् वर्णितः प्रत्येकविषयः प्रकृतिविज्ञानयोः गहनसूक्ष्मचिन्तनायाः सत्यस्य च प्रतिफलं दृश्यते। अस्मिन् विविधानां शस्त्रास्त्र निर्माणस्य वैज्ञानिको निर्देश उपलभ्यते। मनोविज्ञानस्य परामनोविज्ञानस्य च सूक्ष्मविषयाणां विस्तृतं वर्णनमपि प्रसृतं दृश्यते। अनुसन्धानानन्तरं यदा कदाऽपि अथर्ववेदस्य सर्वाङ्गपूर्णस्वरूपं दृग्गोचरी भविष्यति–तदा तु स्पष्टं भविष्यति यदयं वेदरू व्यावहारिकजीवने, वैज्ञानिकानुसन्धाने ऋतसम्पादने, सूक्ष्मगहनचिन्तने च सम्पूर्णवदिकवाङ्मये प्राथम्यं बिभर्ति।

अथर्ववेदः रहस्यात्मको विद्यते। अस्मिन् वर्णितः विषयः विशदविवेचनामपेक्षते। आयुर्वेदचिकित्साया ओषधिशास्त्रस्य च प्रथमोज्जृम्भणम् अस्मिन् दृश्यते। वर्चस्कामदीर्घायुष्यादिपराणि सूक्तानि अस्मिन् भूयशो वर्णितानि सन्ति। विषयाणां वैविध्यं तु स्पष्टमेव दृग्गोचरी भवति। पुनरपि संक्षेपेण सामान्यपरिचयार्थम् एवं विभागं कर्तुं शक्नुमः।

**आध्यात्मसूक्तानिः** एवंभूतेषु सूक्तेषु अध्यात्मतत्त्वस्य विशदविवेचनं प्राप्यते। अस्मिन् आध्यात्मिक–दार्शनिक–सूक्तानां प्राचुर्यं दृश्यते। अध्यात्मतत्त्वस्य विवेचना औपनिषद्शैलीमनुसृत्य– उज्जृम्भमाणा वरीवर्ति। एवं भूतेष प्रकरणेषु–अध्यात्मम्, आत्मा अमृतत्त्वम्, आत्मगोपनम्, शान्तिः, स्वस्ति, पञ्चौदनम्, प्राणः, परमधाम, स्वोतिः, ज्योति[1] एतत्–प्रभृतीनां विषयाणां विवेचनम् वैशधन उपलभ्यते। अन्तर्दृष्टिसंवलितैः प्रातिभचक्षुभिः ऋषिभिरनुभूतानामध्यात्म तत्त्वानां सुविस्तृतं विवेचनं दार्शनिक दृष्ट्या एतेषां सूक्तानां नितान्तं वैशिष्ट्यमावहति।

**ब्रह्मण्यानि सूक्तानिः** एवंभूतेषु सूक्तेषु परमेष्ठिनः स्वरूपं कार्यं च विवेचितम्।[2] एतेषां ब्रह्मण्यसूक्तानां कारणेनैव अथर्ववेदः ब्रह्मवेद इत्यभिधीयते। ब्रह्मणः स्वरूपस्य वर्णनेन सहैव महद्ब्रह्म, ब्रह्मोदनम्, ब्रह्मगवी, विराट्, भुवनस्पति, विश्वकर्मा[3]–इत्यादिरूपेण ब्रह्मतत्त्वस्य निरूपणं विवेचनं च वेशयेन दश्यते। उपनिषत्सु ब्रह्मतत्त्वस्य दर्शनार्थनिरूपणप्रसंगे हिरण्यमयकोशचर्चितं कथितञ्च यत् सः हिरण्यकोशोऽपि ज्योतिषावृतः, परम् अथर्ववेदस्तु स्पष्टरूपेण वर्णयति –

''तस्मिन् हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः।।''[4]

तं बृह्मतत्त्वं वेतृणाम् ब्रह्मतेजसोऽपि वर्णनमथर्ववेदे प्राप्यते। ब्रह्मतेजसः तिरस्कर्तारमथर्ववेदः भृशं निन्दन्नाह –

''तं वृक्षा अपसेधन्ति छायां नो मोपगा इति।
यो ब्राह्मणस्य सद्धनम् अभिनारद मन्यते।'' इति।।[5]

**इन्द्रादिदेवसूक्तानि :** ऋग्वेदवत् अथर्ववेदेऽपि बहूनां देवानां वर्णनमस्ति। इन्द्रसम्बन्धिन्यः प्रायशः सर्वाः ऋचः ऋग्वेदसदृशाः। इन्द्र, अग्नि, आदित्य, अश्विनौ, जातवेदा, बृहस्पति, मरुत्, रूद्र, विष्णु, वैश्वानर, सूर्य, सविता, सोमपवमानादिदेवानाम्[6], अदिति, विद्युत्, इडा, उषा, वाक्, सरस्वत्यादीनामन्यासां प्रमुखानां देवीनाम्[7] च वर्णनम् विविधरूपेण कृतम्। यातुधानानां विनाशाय इत्थम् इन्द्रः प्रार्थितः–

"इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम्।
विग्रीवांसो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम्।।" इति।[8]

**भैषज्यानिसूक्तानि** : एतेषु सूक्तेषु भैषज्यस्य विभिन्नानां रोगाणां च[9] परिचयः तेषां चिकित्सायाश्च वर्णनम् विद्यते। अनेकरोगाणां तु नामोल्लेखपूर्वकं विस्तृतरूपेण वर्णनं कृतम्। तथाहि – कास, बलास, यक्ष्मा, तक्मा, अक्षिरोग, कुष्ठ, दुःस्वप्न, क्लीबत्व, उन्मत्तमोचनम्, गण्डमाला, ज्वर, हृद्रोग, प्रसूति, इषुनिष्कासनम वनस्पति, क्रिमीघ्नम्, चिकित्सा, विषदूषणम्, विषघ्नम्, औषधि–इत्यादीनां[10] वर्णनलक्षणोपचारादिक विस्तृतरूपेण दृश्यते। औषधविज्ञानमपि वर्णितं प्राप्यते, अत एवायं वेद आयुर्वेदस्य मूलं विज्ञायते। ताण्ड्यमहाब्राह्मणकारस्य एषा उद्घोषणा– "भेषजं वा अथर्वणानि भेषजमेव तत्करोति"– इति समीचीनैव।

**आयुष्याणि सूक्तानि** : दीर्घायुष्याभ्युदयः मृत्युंजयादि[11] मन्त्रा अस्मिन् विषये समाहिताः भवन्ति। एतेषु सूक्तेषु शतं शरदः शतं हेमन्तांश्च जीवनाय मृत्युकारणेभ्यः त्राणाय च प्रार्थनाः दृश्यन्ते। मृत्योः सामाज्यं सर्वत्र विद्यते। आबालवृद्धा मनुष्याः पशुपक्षि–कीटपतंगादयः सर्वेऽपि मरणभयात् भीता भवन्ति। मृत्युनिगडितान् तान् मृत्योः पड़वीशाद् मोचयितुं तेषां मनस्सु आत्मविश्वासं चोत्पादयितुमथर्ववेदः प्राहः–

मृत्युरीशे द्विपदा मृत्युरीशे चतुष्पदाम्।
तस्मात् त्वां मृत्योर्गोपतेरुद् भरामि स मा बिभेः।। इति।।[12]

**पौष्टिकानिसूक्तानि** : एषु बलवीर्यपराक्रमादि[13] पुष्टिकामानि मन्त्रसूक्तानि अन्तर्भवन्ति। यशम्, रयि, वाजीकरणम् केशदहणम्, हिरण्यधारणादिकमधिकृत्य[14] प्रणीतानि सूक्तानि अपि सन्ति। अत्र स्तोता यशः वर्चस्कामः एवं प्रार्थयति –

"यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः।।" इति।[15]

**प्रायश्चित्तानि सूक्तानि** : स्खलनमानवस्य स्वभाविकी क्रिया विद्यते, अल्पज्ञत्वात्। अथर्ववेदे एवं विधानां ज्ञाताज्ञाताव स्थायां वा भूतानां दुष्कृत्यानां निवारणार्थं प्रेरणा प्रार्थना च विद्यते। तथाहि– पाप, शाप, अरिष्ट, एनः, दुःख, ईर्ष्यादिनाशनं[16] अपि च, पाश–बन्ध मोचनं[17] कृत्वा पवमान[18] सूक्तानि–उपलभ्यन्ते। एतेषु सूक्तेषु प्रायश्चित्तकरणाय यज्ञविधानं, दण्डविधानम् अनुष्ठानादिकं प्रार्थना वा सन्ति, येषु शारीरिकात्मिकस्खलनानां दुःस्वप्नादीनामपशकुनानां च विनाशस्योपायाः दर्शिताः। अत्र स्तोता पवमानादि देवान् एवं स्तौति –

"पुनन्तु मा देवजनाः पुनन्तु मनवो धिया।
पुनन्तु विश्वाभूतानि पवमानः पुनातु मा"।। इति।[19]

**राजकर्माणि सूक्तानि** : नृपसम्बन्धीनि बहूनि सूक्तानि अथर्ववेदे प्राप्यन्ते। राजकर्माणि[20] तत्र सर्वाङ्गशो वर्णितानि सन्ति। पत्रवः पराजिताः स्युः तेषां सर्वनाशो[21] भवेद् इत्यनया कामनया तत्साधनानां रथशस्त्रास्त्रसेनानायकसैन्यादीनामपि वर्णनं विहितम्। तथाहि – वर्म, रक्षोघ्नम्, विजय, संग्रामजय, एकवीरः, वीररथम्, प्रजादीनामपि[22] विस्तरेण वर्णनम् उपलभ्यते। विजयाभिलाषिणः राज्ञः युद्धोपकरणेषु 'दुन्दुभेः' वर्णनमनेकसूक्तेषु कृतम्।[23] दुन्दुभिः संग्रामेषु वीरयोद्धृणां हृदयेषु प्रबलोत्साहं संचारयतीत्यादि वीररसस्य नितान्तं साहित्यिकं वर्णनं प्राप्यते। दुन्दुभेः गर्जनं श्रुत्वा शत्रुहृदयानि वेपन्ते। दुन्दुभिवर्णनपरो निम्नलिखितः उपमालंकारेणालंकृतो मन्त्र आकर्षति स्वान्तं पाठकानाम् –

यथा श्येनात् पतत्रिणः संविजन्ते अहर्दिवि सिंहस्य स्तनयोर्यथा।
एवा त्वं दुन्दुभेऽमित्रानभिक्रन्द प्रत्रासयाथो चित्तानि मोहय।।
इति।[24]

**ब्रह्मचर्यसूक्तानि** : यद्यपि ब्रह्मचर्यनाम्ना एकमेव षड्विंशत्यृचात्मकं सूक्तं प्राप्नोति[25], परं तस्मिन् ब्रह्मचर्यस्य महिमा विस्तृतरूपेण दर्शिता। ब्रह्मचारिणः कर्तव्यकर्माणाम् – ब्रह्मयज्ञ, ब्रह्मकर्म, मेखलाबन्धनं, मेधायाचनादिकमपि वर्णनम् प्राप्यते[26]। ब्रह्मचारिणः प्रशंसन् कथितं यत्– रोदसी, राष्ट्रम् दिवमपि च ब्रह्मचारी एव स्व तपसा रक्षति। किमधिकं देवा अपि ब्रह्मचर्येण मृत्युम् अजयन्–

ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत्।। इति।[27]

**गृहस्थवर्णनम्** : अथर्ववेदे द्वितीयाश्रमोपदेशकानि स्नेहानुबन्धानि च अनेकानि सूक्तान्युपलभ्यन्ते। येषु सूक्तेषु गार्हस्थ्यसौख्यं–कामः, कामिनी, जाया, पतिलाभः, गर्भाधानं, वीरप्रसूतिः, प्रीतिः, स्वस्तिः, भगः, द्रविणम्, शान्तिः, सुखम्, सांमनस्यम्, सौभाग्यम्, शालादिकानाम्[28] सूक्ष्मधिया विशदं मनोवैज्ञानिकं च वर्णनम् विहितम्। गृहस्थे दम्पती कथमपि प्रेमपरिप्लुतौ स्यातामिति अधोऽङ्किते मन्त्रे उपमया दर्शयति–

यथा वृक्षं लिबुजा समन्तं परिषस्वजे।
एवा परिष्वजस्व मां पथा मां कामिन्यसो यथा मन्नापगा असः।।
इति।[29]

**वानप्रस्थसंन्यासयज्ञादिवर्णनम्** : गृहीभूत्वा वनी भवेत्, बनी भूत्वा प्रव्रजेत् इत्यनुसृत्य तृतीय चतुर्थाश्रमी वानप्रस्थसंन्यास नामभ्याम् अभिधीयते। अथर्ववेदे एतयोः वर्णनं सम्यग्रूपेण दृश्यते।[30] सहैव अतिथियज्ञ, पितृमेधयज्ञादीनामपि प्रतिपादनं विस्तरेण कृतम्।[31] वानप्रस्थः संन्यासी वा अत्र व्रात्य नाम्ना संबोधितः। सः व्रात्य सर्वस्यैव पूज्यो भवति, यदि वा सः कस्यापि गृहे समागतः स्यात् तदा किं कर्तव्यम्? अथर्ववेदः अत्र दिशति–

"स्वयमेनमभ्युपेत्य ब्रूयाद् व्रात्य क्वावात्सी व्रात्योदक व्रात्य
तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु व्रात्य यथा ते वशस्तथास्तु
व्रात्य यथा ते निकामस्तथास्त्विति"।। इति।[32]

तथैवातिथिरपि पूज्यो भवति, तस्मात्पूर्वं तु भक्षणमपि निषेधितम् –

"एष वा अतिथिर्यच्छ्रोत्रियस्तस्मात् पूर्वो नाश्नीयात"।। इति।[33]

**मातृभूमेः पृथिव्याः वर्णनम्** : मातृभूमिपृथिवीमुपजीव्य विस्तृतरूपेण त्रिषष्ट्योत्तर ऋचात्मकम् एकमेव सूक्तं प्राप्यते।[34] पृथिव्या महिम्नः इदं वर्णनं स्वाधीनतानुरागिणः स्वच्छन्दरसिकस्य आथर्वणस्य ऋषेः सुरम्यो हृदयोद्गारः। एवं भूताय प्रौढकाव्यकल्पनाया भव्यभावुकतायश्च दर्शनमन्यत्र दुर्लभम्। सूक्तेऽस्मिन् मातृभूमः भृशं मनोरमा सर्वाङ्गपूर्णा च कल्पना कृता। मातृभूमे इदं रूचिरं वर्णनम् देशभक्तेः प्रेरणायाः मधुरो विलासः। मन्ये, मातृभूमिः सजीवरूपेण अस्माकं समक्ष प्रस्तुता। सर्वेऽपि अनुभवन्ति–

"माता भूमि पुत्रोऽहं पृथिव्याः"।। इति।[35]

इयं भूमिः मह्यं तथैव क्षीरं प्रयच्छतु यथा जननी स्वाभाविकानुरागेण स्वसुताय प्रयच्छति–

"सा नो भूमिर्विसृजतां माता पुत्राय में पयः"।। इति।[36]

पृथिव्याः न एकाङ्गि अपितु सर्वाङ्गपूर्ण रूपमस्मिन् सूक्ते प्रस्तुतम्। सूक्तमिदं राष्ट्रियां भावनां संवर्धयन्– ''वयं तुभ्यं बलिहृतः स्याम'' इत्येवं मातृभूम्यै बलिदानाय प्रेरयति।।

**अब्वृष्टिः वर्णनम्** : आपः वृष्टिसूक्तेषु अनयोः मनोहारी वर्णनमुपलभ्यते।[37] आपः सम्बन्धि सूक्तेषु विविधरूपेण वर्णनं दृश्यते। न केवल साहित्यिकशैलीमनुसृत्य, अपितु निर्वचनशैलीमनुसृत्य व्याकरोति :उदकम्'–

''एको वो देवोऽप्यतिष्ठत् स्यन्दमाना, यथावशम्।
उदानिषुर्महीरिति तस्मादुदकमुच्यते''।। इति।[38]

वृष्टिसूक्तेषु वृष्टेः रमणीयम्, साहित्यिकमुज्ज्वलं वर्णनमस्मिन् वेदे दृश्यते। अधर्व्चः कस्यपि कवेः रचनासादृश्यमावहति–

गणास्त्वोष गायन्तु मारूता पर्जन्य घोषिणः पृथक्।
सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु''।। इति।[39]

**विभिन्नानिमपिसूक्तानि** : एतेषु सूक्तेषु विभिन्नानाम्–आञ्जन–अपामार्ग–पृश्नीपर्णी– लाक्षा–अस्तृत–जागिड–दर्भ प्रसिर–शङ्ख–वरणादि मणीनाम्[40], कृत्या–यातुधानक्षय–पिशाचक्षय– दस्युनाशनम्–मणिबन्धनमादिकं वैशयेन उपनिबद्धम[41]। एवं भूतेषु मणीनामुत्पत्तिस्थानम् गुणधर्मादिकं च वर्णितम्। एते मणयः समृद्धिकारकाः अपि च विपद्विनाशकाः सन्ति। शरीरधारितैः एभिः मणिभिः दीर्घायुष्को भवति मानवः। वरणमणेः राष्ट्रबलं, सैन्यबलं, पशुबलं च प्रार्थयति ऋचा

इयं बिभर्ति वरणमायुष्माञ्छत शारदः।
स मे राष्ट्रं च क्षत्रं च पशूनोजश्च मे दधत्।।इति।[42]

कृत्यावर्णनसूक्तेषु अभिचारकर्मादीनाम् प्रसार अवलोक्यते। परम्परानुसारं ज्ञायते यत् कृत्या नाम मन्त्रबलेन मारणोच्चाटनादि कर्म भवति। तथाहि –

इष्वा ऋजीयः पततु द्यावापृथिवीं तं प्रति।
सा तं मृगमिव गृह्णातु कृत्या कृत्याकृतं पुनः।। इति।[43]

**इतरविषयसूक्तानि** : अन्येऽपि बहवो विषयाः सन्ति, येषां वर्णनम् अथर्ववेदे वैशयेन प्राप्यते। अथर्ववेदः विषयवैविध्यानां तु आकर एव विद्यते। प्रायशः प्रतिसूक्ते अन्यान्य विषयाणाम् वर्णनम् उपलभ्यते। अवशिष्ट मुख्यविषयाणाम् नामोल्लेखमेव पर्याप्तं स्यात्। तथाहि– अन्नम्, ओदनः, कुन्ताप, खिल, दर्भः, कालः रात्रिः, अश्वादिपशवः, वाणिज्य, वाजी कृषीत्यादिनाम[44] वर्णनमपि वैशयेन सर्वाङ् गरूपेण च प्राप्यते। इति।।

**संदर्भाः**


1. अध्यात्मम्–4.11/11.8/13.1–9/15.1–18/आत्मा–5.9/7. 1–3, 5, 67, 111/9.9–10/ अमृतत्त्वम्–5.1/6.1/7. 106/आत्मगोपनम्–4.2/5.10/6.3–4/7.102/शान्तिः–19. 9–11 /स्वस्ति–7.26/पञ्चोदनम्– 9.5/12.3–इत्यादयः।
2. ब्रह्म–4.1/5.6/7/21,66/10.2,8/11.7/19.5–6, 22, 43/
3. महद्ब्रह्म– 1.32/ब्रह्मोदनम् – 4.34/11.1/ब्रह्मगवी–5. 18–19/12.5/विराट–8.9–10/ भुवनस्पति–2.2/5. 2/विश्वकर्मा–2.35/6.61, 107, 7.4, 87– इत्यादयः।
4. अ. 102.32
5. अ. 5.19.9
6. इन्द्र–2.5/6.2,33/7.72,86,91–92/20. 1–12 बहवः। अग्नि–5.27/6.49/7.71, 82/20 1–2 इत्यादयः। आदित्य–7.7/अश्विनौ–20 125,139–143/जातवेदस् – 19. 3/बृहस्पतिः– 20.16,88,90–91/सूर्य–20. 4–48,58,107/सविता–6.1/7. 14–16,24,30–इत्यादयः।
7. अदिति–7.6/विद्युत्–13.1/इडा–7.27/उषा–19. 12/वाक्–4.30/7.43/16–2/सरस्वती – 7 10–11 – इत्यादयः।
8. अ. 8. 4. 24
9. भैषज्य–1.4–6,6.22–24, 52,83/विभिन्नरोगपरिचयनिवारणञ्च–1.2–3/3.7/4. 13/5.15– 16,30 इत्यादयः।
10. कास 6.105/बलास–6.14, यक्ष्मा–1.12/2.33/3.7, 31, तक्मा–1.25/5.4,22/ अक्षिरोग–6.16, कुष्ठ–1.23–24, दुःस्वप्न–6.45–46/7.23,100–101/गण्डमाला 7.74, 76/ ज्वर–1.25/6.20/वनस्पति–3.18/4.12/विषघ्नम्–4. 6–7/5.13/6.12,56–इत्यादयः।
11. आयुष्य – 6.76/19.60,63/ दीर्घायुष्यम् – 1.30,35/2. 4,9,13,28–29 बहवः/मृत्युञ्जय – 4.32/6.13, अभय–2 15/6.40,50/ इत्यादयः।
12. अ. 8 2.23
13. वर्चः – 3.22/6.5, 38–39/ बलवीर्यादि– 1.15/2.17/3. 16, 19 बहवः।
14. यशः – 6.58/ रयि – 3.10,20/वाजीकरणम्–4.4/6. 72,101/केशवृंहणम्–6.21,136–137 – इत्यादयः।
15. अ.6.39.3
16. पाप–4.23–29,33/6.26,30,113,115 बहवः। शाप–2.7/6. 37/7.59/ अरिष्ट– एनोनाशनम् – 6.27–29, 51, 80/– इत्यादयः।
17. 17 पाशमोचनम्– 1.10,31/2.10/बन्धमोचनम् – 7.78/ – इत्यादयः।
18. पवमान – 6.19, 62/
19. अ.6.19.1
20. राजा– 6.88,128/3.5/ राज्याभिषेक – 4.8/3.3–4/ राष्ट्रधारण– 1.29/3.8/4.30 सुरक्षा– 2.16/11. 17–18,20,27/ सेनानिरीक्षणम् – 4.31–32/ – इत्यादयः।
21. शत्रुक्षय– 1.19–21/2.27/3.1–2,27/अरातिक्षय–5. 7/सपत्नक्षय–6.75/7.35/ अमित्रक्षय – 4.22/6.54/ – इत्यादयः।
22. वर्म– 7.118/ रक्षोघ्नम् – 1.28/5.29/ विजय– 1.9/7. 50/ संग्रामजय– 6.99/ एकवीर – 3.19/6.98/ प्रजा– 3.4/7.19/ – इत्यादयः।
23. दुन्दुभिः – 5.20–21/6.126
24. अ.त.21.6
25. अथर्व. – 11.5
26. ब्रह्मयज्ञ–19.42/ब्रह्मकर्म–5.24/मखला–6.33/मेधा–1. 1/6.108/ 19.40
27. अ. 11.5.19
28. कामः – 3.25/ 6.8–9,68/9.2/ विवाहः – 14 सम्पूर्णकाण्डम्/ कामिनी– 2.30/ जाया – 6.82,122/ गर्भाधानम् – 5.25/6.17.81/8.6/ प्रसूति– 1.11/3. 23/ प्रीतिः – 6.89/ स्वस्तिः – 1.27/ 3.16/6.48,93/ भगः – 6.129/ द्रविणं –7.17/ शान्तिः – 3.21/ सुख–7. 69/ सामनस्यम् – 3. 30/ सौभाग्यम् – 6.139/ शाला–3.12/ इत्यादयः बहवः सन्ति।
29. अ. 6.8.1
30. अथर्व. 15 सम्पूर्ण काण्डम्। .

31. अतिथिः – 9.6 अग्र द्विषाष्ट्यात्मकं सम्पूर्णम् सूक्तम्। पञ्चदशे काण्डेऽपि सर्वत्र दृश्यते। पितृमेधः–अष्टादशं काण्डं सम्पूर्णम्। यज्ञ– 5.12/7.97/– इत्यादयः।
32. अ. 5.11.2
33. अ. 9.6.37
34. अ. 12.1
35. 12.1.12
36. अ. 12.1.70
37. आपः – 1.33/3.13/7. 39–40/इत्यादयः/वृष्टिः – 4. 15/6.22/7.18
38. अ. 3.13.4
39. अ. 4.15.4
40. आञ्जनम् – 4.9, 7.30, 36/ अपामार्गः – 4.17–19/ पृश्नीपर्णी– 2.25/ लाक्षा–5.5/ अस्तृतं–19.46/ दर्भः – 19.28–30/ इत्यादयः।
41. कृत्या– 5.14, 31/ यातुधानपिशाचदस्युनाशनम् – 1. 7–8/4.20/2.14/मणिबन्धम् – 10.6 इत्यादयः।
42. अ. 10.3.12
43. अ. 5.14.12
44. अन्नम् – 6.71,142/ ओदनम् – 11.3/ कुन्ताप–20. 127–137/ खिलानि–20 . 49/ दर्भ– 19.32–33/ काल– 19.53–54/ अश्व–6.70/ गावः – 3.14/4.21/ आप्री– 5.12, 27/ कृषि– 3.17/ इत्यादयः बहवः सन्ति।